National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2024; 1(57): 245-248
© 2024 NJHSR
www.sanskritarticle.com

डा. दयानन्दपाणिग्राही
सहायकाचार्यः,
कलियाचकविक्रमकिशोर-
आदर्शसंस्कृतमहाविद्यालयः,
हेडिया, पूर्व मेदिनीपुरम्, पश्चिमबंगाः

Correspondence:
डा. दयानन्दपाणिग्राही
सहायकाचार्यः,
कलियाचकविक्रमकिशोर-
आदर्शसंस्कृतमहाविद्यालयः,
हेडिया, पूर्व मेदिनीपुरम्, पश्चिमबंगाः

# इन्द्रियनिग्रहे मनोः दर्शनस्य प्रासङ्गिकता

**डा. दयानन्दपाणिग्राही**

**शोधसारः**

भारतीयसंस्कृतौ इन्द्रियनिग्रहः नैतिकजीवनस्य आध्यात्मिकसाधनायाश्च मूलाधाररूपेण परिगण्यते। मनुस्मृतौ मनुना मानवजीवनस्य शुद्धये, समाजव्यवस्थायाः संरक्षणाय तथा च आत्मोन्नत्यै इन्द्रियनिग्रहस्य विशेषमहत्त्वं प्रतिपादितम्। मनोः मतानुसारम् यथा दुष्टाश्वाः सारथिं कुमार्गे पातयन्ति तथैव अनियन्त्रितेन्द्रियाणि मानवं पतनमार्गे नयन्ति, संयतेंद्रियः पुनः धर्ममार्गे प्रतिष्ठितः भवति। एतदेव काठकश्रुतिरपि कथयति। यथा -

**इन्द्रियाणि हयानाहुर्विषयाँस्तेषु गोचरान् ।आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः ॥**
**यस्त्वविज्ञानवान्भवत्ययुक्तेन मनसा सदा ।तस्येन्द्रियाण्यवश्यानि दुष्टाश्वा इव सारथेः ॥**

मनुस्मृतौ कामः, क्रोधः, लोभः, मदः, मोहः इत्यादीनां दोषाणां मूलम् असंयम एवेति निरूपितम्। अतः सत्यं, शौचम्, दमनम्, क्षमा, धृतिः, आत्मसंयमः च मानवस्य सदाचारनिर्माणे अनिवार्यतया निर्दिष्टाः। मनुना इन्द्रियनिग्रहः सामाजिकशान्तेः, मानसिकस्वस्थतायास्तथा व्यक्तित्वविकासस्य आधारभूततत्त्वत्वेन प्रतिपादितः।

वर्तमानभोगप्रधानसमाजे यत्र मानवः विषयासक्त्या मानसिकदुश्चिन्तया, नैतिकपतनेन च पीड्यते, तत्र मनोः इन्द्रियनिग्रहसम्बद्धदर्शनं विशेषतया प्रासङ्गिकं दृश्यते। अस्मिन् शोधे मनुस्मृतौ प्रतिपादितस्य इन्द्रियनिग्रहस्य स्वरूपं, तस्य दार्शनिकाधारः, नैतिकसामाजिकमहत्त्वं तथा आधुनिकजीवने तस्य उपयोगिता च वर्ण्यते।

**कूटशब्दाः**

इन्द्रियनिग्रहः, मनुस्मृतिः, आत्मसंयमः, धर्मः, सदाचारः, मनोदमनम्, नैतिकता, कामक्रोधौ, आध्यात्मिकता, मानवजीवनम्।

**उद्देश्यम्**

- मनुस्मृति मध्ये प्रतिपादितस्य इन्द्रियनिग्रहस्य स्वरूपं ज्ञातुम्।
- मनोः दर्शनानुसारम् आत्मसंयमस्य महत्त्वं विवेचितुम्।
- कामक्रोधलोभादीनां निग्रहे इन्द्रियनिग्रहस्य भूमिकां निरूपयितुम्।
- नैतिकजीवननिर्माणे मनुस्मृत्याः योगदानं प्रकाशयितुम्।
- आधुनिकसमाजे मनोः इन्द्रियनिग्रहदर्शनस्य प्रासङ्गिकतां प्रतिपादयितुम्।

**उपक्रमः**

सुखं मे स्यात् दुःखं मा भूत् इति वैदिकां सद्भावनामुद्दिश्य सर्वाण्यपि शास्त्राणि दुःखात्यन्तनिवृत्तये परमनिरतिशयसुखप्राप्तये च प्रवृत्तातीति । तानि सर्वाण्यपि शास्त्राणि यानि निरतिशयसुखप्राप्तिसाधनानि भवन्ति दर्शनानि इत्युच्यते तत्तद्विदैः । एवं वेदादिभ्यः आरभ्यः परम्पराशास्त्रं निरतिशयसुखसाधकं दर्शनमित्यप्यपटनाम्ना सम्बभूव । यतो हि दृश्यते येन निरतिशयसुखप्राप्ति मार्गः परमतत्त्वत्वेन तद्दर्शनमित्यपि काचित् परिभाषा । तस्य च मार्गस्य प्राप्तये यानि साधनानि उक्तानि । तानि सर्वाण्यपि दर्शनमिति करणार्थे गृहीतान्यपि भवन्ति ।

परम्परामिमामनुसृत्य नैके महर्षयः स्वाभिरप्रायप्रकटनाय नैकानि शास्त्राणि रचयामासुः । तेषु यानि ज्ञानप्राप्तिसाधनानि निःश्रेयसमार्गदर्शकानि वभूयुः तानि दर्शनामीति भभूवन् । एवं परम्परातः प्रजापतेः सकाशात् प्राप्तं मनुना उक्तं स्मृतिशास्त्रमपि निःश्रेयसमार्गसंसाधकत्वेन दर्शनपदवाचार्हं भवति । यतो हि अस्मिन्नेव शास्त्रे उल्लिख्यते-

**चतुर्वेदसमं पुण्यमस्य शास्त्रस्य धारणात् ।**
**भूयो वाऽप्यतिरिच्यते पापनिर्यातनं महत् ।।**(मनुस्मृतौ १२.१०)
इत्येतन्यानवं शास्त्रं भृगुप्रोक्तंपठन्द्विजः।
**भवत्याचारवान्नित्यं यथेष्टां प्राप्नुयादगतिम् ।।**(मनुस्मृतौ १२.१२६)
**ये पठन्ति द्विजाः केचित्सर्वं पापोपशान्तिदम् ।**
ते गच्छन्ति परं स्थानं ब्राह्मणः सद्य शाश्वतम् ।।(तत्र परि.१२.१२)

अतः अस्य परमपुरुषार्थसाधकशास्त्रत्वेन दर्शनशास्त्रमिति संज्ञाऽपि निर्वहति इति नास्ति विचिकित्सा।किं च मनोर्माहात्यं श्रुतिष्वपि विद्यते- यद्वैकिञ्च मनुरवदतद्भेषजम् (ब्रह्मसूत्रशांकरभाष्ये२.१.१.१) इति ।

इतश्च ब्रह्मसूत्रे अविरोधाध्याये प्रथमाधिकरण(स्मृत्याधिकरण) व्याख्यानावसरे स्मृत्यनवकाशदोषप्रसङ्गान्नेतिचेन्नान्यस्मृत्यवकाश-दोषप्रसङ्गः(ब्रह्मसूत्रे२.१.१.१) इत्यस्मिन् सूत्रे सांख्यस्मृतेः निराकरणपूर्वं मनुस्मृतेः माहात्म्यं सर्वाधिकत्वं निःश्रेयससाधन-परत्वञ्चापि भववत्पादैः श्रीमदाचार्यशङ्करैः प्रतिपादितम् । अतः नाशङ्कनीयमस्य दर्शनशास्त्रत्वविषये ।

सम्प्रत्यधुना विचारवेलायां वर्तमानप्रसङ्गे का चास्य प्रासङ्गिकतेति प्रश्नस्य समुत्तरे अस्ति महत्येव प्रासङ्गिकता इति महता कण्ठेन जोघुष्यते ।

धर्मशास्त्रं तु वै स्मृतिः (मनुस्मृतौ २.१०) इत्यनुसारं धर्मशास्त्रत्वेन धर्मप्रतिपादकं शास्त्रमपि स्मृतिरिति कथ्यते। धर्ममूलमेव शास्त्रं धर्मशास्त्रं भवति। स च धर्मः आत्यन्तिकदुःखनिवृत्तिपूर्वकं सुखप्राप्तिसाधनं भवति। तथाह मनुः—

**श्रुतिस्मृत्युदितं धर्ममनुतिष्ठन् हि मानवः।**
**इह कीर्तिमवाप्नोति प्रेत्य चानुत्तमं सुखम्॥** (मनुस्मृतौ२.९)

अस्य तात्पर्यमिदं यत् मानवः यदि श्रुतिस्मृतिप्रतिपादितं धर्मं सम्यगनुतिष्ठति, तर्हि सः ऐहिकजीवने कीर्तिं, समृद्धिं, सामाजिकमानञ्च प्राप्नोति, परलोके च परमं सुखमवाप्नोति। अतः साम्प्रतिकपरिस्थितौ अपि धर्मशास्त्रस्य प्रासङ्गिकता नूनमेव दृश्यते। प्रायशः वर्तमानसमाजे युवकानां दिग्भ्रष्टता, मन्त्रिणां विचारहीनता, राजतन्त्रस्य पतनम्, निरुद्योगिता, अस्वच्छता, समयाननुवर्तनम्, देशद्रोहः, आतङ्कवादः, धर्मान्तरणम् इत्यादयः अनेकाः सामाजिकसमस्याः समुत्पन्नाः सन्ति। एतासां समस्यानां समाधानाय मनोः दर्शनं विशेषतया उपयोगि भवति। वस्तुतः मन एव मनुष्यस्य बन्धमोक्षयोः कारणं भवति। अत एव उच्यते—

मन एव मनुष्याणां कारणं बन्धमोक्षयोः।

मनसः संयमेन इन्द्रियाणां निग्रहः संभवति, इन्द्रियनिग्रहेण च जीवनस्य शुद्धिः, समाजस्य च उन्नतिः भवति। भगवता श्रीकृष्णेनापि उक्तम्— "इन्द्रियाणां मनश्चास्मि "(भगवद्गीतायां १० इति। तेन ज्ञायते यत् मन एव सर्वेन्द्रियाणां नेता अस्ति।

एतस्मिन् प्रसङ्गे मनुः प्राणसंयमस्य महत्त्वमपि वर्णयति—

**दह्यन्ते ध्मायमानानां धातूनां हि यथा मलाः।**
**तथेन्द्रियाणां दह्यन्ते दोषाः प्राणस्य निग्रहात्॥** (मनुस्मृतौ६.७१)

यथा अग्निना तप्यमानानां धातूनां मलाः नश्यन्ति, तथैव प्राणायामेन, मनोनिग्रहेण, इन्द्रियसंयमेन च मनुष्यस्य अन्तःकरणस्थिताः दोषाः विनश्यन्ति। अतः युवकानां चरित्रनिर्माणाय आत्मसंयमः अत्यावश्यकः।

समाजस्य नैतिकाधाररूपाणि धर्मलक्षणानि मनुना दशधा निर्दिष्टानि—

**धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः।**
**धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम्॥** (मनुस्मृतौ६.९२)

अत्र धृतिः धैर्यम्, क्षमा सहिष्णुता, दमः मनोनिग्रहः, शौचं बाह्याभ्यन्तरपवित्रता, इन्द्रियनिग्रहः विषयेषु संयमः, सत्यं सत्यवादिता, अक्रोधः क्रोधत्यागश्च इति धर्मस्य मूलतत्त्वानि प्रतिपादितानि। यदि एतानि गुणानि युवकानां जीवनं प्रविशेयुः, तर्हि समाजे नैतिकपतनस्य प्रश्न एव न भवेत्।

सम्प्रति युवकाः प्रायः विषयभोगेषु आसक्ताः दृश्यन्ते। इन्द्रियाणामसंयमेन ते कुपथि गच्छन्ति। अतः मनुः चेतयति—

**इन्द्रियाणां प्रसङ्गेन दोषमृच्छत्यसंशयम्।**
**संनियम्य तु तान्येव ततः सिद्धिं नियच्छति॥** (मनुस्मृतौ२.९३)

अर्थात् इन्द्रियविषयेषु आसक्तः पुरुषः नूनं दोषान् प्राप्नोति, किन्तु यः तानि संयच्छति सः जीवने सिद्धिमधिगच्छति। अतः विद्यार्थिनां ब्रह्मचर्यपालनं, सदाचारानुष्ठानं, पितृमातृसेवा, गुरुवचनपालनञ्च अत्यावश्यकं भवति।

विषयभोगेषु अनियन्त्रिता आसक्तिः कथं विनाशकारिणी भवति इति मनुः स्पष्टतया वर्णयति—

**न जातु कामः कामानामुपभोगेन शाम्यति।**
**हविषा कृष्णवर्त्मेव भूय एवाभिवर्धते॥**

यथा वह्निः हविषा अधिकं ज्वलति, तथैव विषयभोगेन कामनाः न शान्तिं यान्ति, प्रत्युत अधिकमेव वर्धन्ते। अतः मनुः विषयत्यागस्य महत्त्वं प्रतिपादयति—

**प्रापणात्सर्वकामानां परित्यागो विशिष्यते।**

**तदनन्तरं ज्ञानेन इन्द्रियनिग्रहस्य श्रेष्ठत्वं वर्णयति—**

**न तथैतानि शक्यन्ते संनियन्तुमसेवया।**
**विषयेषु प्रजुष्टानि यथा ज्ञानेन नित्यशः॥** (मनुस्मृतौ२.९६)

अर्थात् केवलं विषयत्यागेन न, अपि तु ज्ञानद्वारा एव इन्द्रियाणि स्थिरतया संयन्तुं शक्यन्ते।

मनोनिग्रहस्य महत्त्वं मनुः पुनरपि प्रतिपादयति—

**वशे कृत्वेन्द्रियग्रामं संयम्य च मनस्तथा।**
**सर्वान्संसाधयेदर्थान् भक्षयन् योगतस्तनुम्॥** (मनुस्मृतौ१.१००)

यः मनुष्यः मनः तथा इन्द्रियग्रामं वशे करोति, सः सर्वकार्येषु सिद्धिं प्राप्नोति। विजितमनसः पुरुषस्य कृते सर्वं कार्यं सुकरं भवति।

राजकीयव्यवस्थायामपि मनुः निग्रहस्य महत्त्वं प्रतिपादयति—

**निग्रहं प्रकृतीनां च कुर्याद्योऽरिबलस्य च।**
**उपसेवेत तं नित्यं सर्वयत्नैर्गुरुं यथा॥** (मनुस्मृतौ७.१७५)

राज्ञा स्वप्रकृतीनां, शत्रुबलस्य च निग्रहः कर्त्तव्यः। यः राजा अनुशासनयुक्तः भवति, स एव राष्ट्रस्य रक्षणं कर्तुं समर्थः भवति।

अपराधनिवारणस्य विषये मनुः वदति—

**परमं यत्नमातिष्ठेत्स्तेनानां निग्रहे नृपः।**
**स्तेनानां निग्रहादस्य यशो राष्ट्रं च वर्धते॥** (मनुस्मृतौ८.३०२)

राजा यदि अपराधिनां निग्रहं करोति तर्हि राष्ट्रे शान्तिः, सुरक्षा, यशश्च वर्धते। साम्प्रतिककाले भ्रष्टाचारः, चोरी, हिंसा, आतङ्कवादश्च यतः वर्धन्ते, अतः एषः मनोः उपदेशः अत्यन्तं प्रासङ्गिकः।

तथैव पापिनां निग्रहः, साधूनां संरक्षणञ्च राजधर्मस्य प्रमुखभागः—

**निग्रहेण हि पापानां साधूनां सङ्ग्रहेण च।**
**द्विजातय इवैज्याभिः पूयन्ते सततं नृपाः॥** (मनुस्मृतौ८.३११)

अर्थात् यथा यज्ञैः द्विजाः पवित्रतां प्राप्नुवन्ति, तथैव राजा पापिनां दण्डनेन, सज्जनानां रक्षणेन च पवित्रतां, यशश्च प्राप्नोति।

मनुः सर्ववर्णानां कृते सामान्यधर्मानपि निर्दिशति—

**अहिंसा सत्यमस्तेयं शौचमिन्द्रियनिग्रहः।**
**एतं सामासिकं धर्मं चातुर्वर्ण्येऽब्रवीन्मनुः॥** (मनुस्मृतौ१०.६३)

अहिंसा, सत्यं, अस्तेयम्, शौचम्, इन्द्रियनिग्रहश्च— एते सर्वेषां मानवाणां सामान्यधर्माः सन्ति। यदि एते गुणाः समाजे प्रतिष्ठाप्येरन्, तर्हि हिंसा, द्वेषः, भ्रष्टाचारः, असामाजिकता च स्वत एव नश्येयुः।

अन्ते मनुः सात्त्विकगुणानां स्वरूपं वर्णयति—

**वेदाभ्यासस्तपो ज्ञानं शौचमिन्द्रियनिग्रहः।**
**धर्मक्रियाऽत्मचिन्ता च सात्त्विकं गुणलक्षणम्॥** (मनुस्मृतौ१२.३१)

वेदाध्ययनम्, तपः, ज्ञानम्, शौचम्, इन्द्रियनिग्रहः, धर्माचरणम्, आत्मचिन्तनञ्च सात्त्विकजीवनस्य लक्षणानि भवन्ति। एतेषां गुणानां विकासेन एव व्यक्तेः, समाजस्य, राष्ट्रस्य च उन्नतिः संभवति।

इन्द्रियनिग्रहः धर्मस्य प्रमुखं लक्षणम्। इन्द्रियाणि यदि विषयेषु आसक्तानि भवन्ति, तर्हि मानवः पतति। अत्र मनुनोक्तम् –

**इन्द्रियाणां विचरतां विषयेष्वपहारिषु ।**
**संयमे यत्नमातिष्ठेद्विद्वान् यन्तैव वाजिनाम् ॥** इति।(मनुस्मृतौ २.८८)

एतद्विषये गीतायां भगवान् वदति—

**यततो ह्यपि कौन्तेय पुरुषस्य विपश्चितः।**
**इन्द्रियाणि प्रमाथीनि हरन्ति प्रसभं मनः।। इति ।।** (भगवद्गीतायां २.६०)

इन्द्रियाणि बलवन्ति। अतः तेषां निग्रहः आवश्यकः। इन्द्रियाणि स्वबलात् मनः अपहरन्ति। प्रमाथिनि इन्द्रियाणि विपश्चितः पुरुषस्य **मनमपि प्रसभं हरन्ति। अतः श्रीभगवानुवाच**

**"तानि सर्वाणि संयम्य युक्त आसीत मत्परः।**
**वशे हि यस्येन्द्रियाणि तस्य प्रज्ञा प्रतिष्ठिता।। इति ।।"** (भगवद्गीतायां २.६१)

अर्थात् - मनुष्यः सर्वाणि इन्द्रियाणि संयम्य योगयुक्तः सन् भगवति चित्तं निवेशयेत्। यस्य इन्द्रियाणि वशे वर्तन्ते तस्यैव प्रज्ञा स्थिरा भवति। अतः इन्द्रियजयः अवश्यमेव करणीयः। परमात्मनि चित्तं संस्थाप्य निरन्तरं भगवद्स्मरणपूर्वकं जीवनं यापनीयम्। एवं यस्य इन्द्रियनिग्रहः सिद्धः भवति स एव स्थितप्रज्ञ इति कथ्यते।

केचन जनाः भौतिकसुखेषु अत्यधिकश्रद्धया बद्धाः भवन्ति, तेषां मनः विषयभोगेषु निमग्नं भवति। प्रायेण तेषां बुद्धिः कुत्रापि स्थैर्यं न प्राप्नोति। परन्तु ईश्वरध्याननिष्ठा बुद्धिः शीघ्रमेव एकाग्रतां लभते। अतः यस्य बुद्धिः ईश्वरार्पिता भवति, तस्मिन् भोगसुखचिन्ता न जायते।

**"व्यवसायात्मिका बुद्धिरेकेह कुरुनन्दन।**
**बहुशाखा ह्यनन्ताश्च बुद्धयोऽव्यवसायिनाम्।। इति ।।"** (भगवद्गीतायां २.४१)

अत्र 'व्यवसायात्मिका बुद्धिः' इत्यस्य अर्थः निश्चयात्मिका, एकनिष्ठा बुद्धिः इति। यदि बुद्धिः ब्रह्मणि प्रतिष्ठाप्यते तर्हि मनुष्यः शान्तिं लभते। यदि एकाग्रता न भवति तर्हि सा बुद्धिः बहुषु विषयेषु शाखाभेदेन चञ्चलतया विचरति। यस्य बुद्धिः ब्रह्मणि एव स्थिरा भवति, सः निःसङ्कोचं कर्मक्षेत्रे सततं प्रवर्तते।

अभिलाषसङ्कल्पैः बद्धं मनः कदापि शान्तिं न प्राप्नोति। मनः सदैव बुद्धेः उच्चावस्थां प्राप्तुमिच्छति, किन्तु तदशक्यत्वात् कृत्रिमोपायान् अन्विष्यति। यथा कश्चित् घृतस्य प्रयोगेण अग्नेः शमनं कर्तुं प्रयतते, तथैव मूढः पुरुषः शान्तिप्राप्त्यर्थं भौतिकसुखानुभवेषु निमज्जति, किन्तु तद् व्यर्थमेव भवति।

योगयुक्तः पुरुषः सङ्कल्पानाम् अभिलाषाणां च निरोधेन मनः बुद्धौ स्थिरं स्थापयितुं प्रयत्नं करोति। एवं निरन्तराभ्यासेन तस्य सर्वे दुःखसमूहाः शनैः शनैः निवर्तन्ते। आरम्भे एषः अभ्यासः क्लेशकर इव प्रतीतिः भवति, किन्तु परिणामे स एव अमृततुल्यमानन्दं ददाति। भगवान् श्रीकृष्णः निष्कामकर्मणः महत्त्वं प्रतिपादयन् अर्जुनं उपदिशति यत्—कर्मफलस्य इच्छां परित्यज्य मनुष्येण निरन्तरं स्वकर्तव्यकर्म अनुष्ठेयमेव।

**तानि सर्वाणि संयम्य युक्त आसीत मत्परः।।** इति ।। (भगवद्गीतायां २.६१)

किं च यः खलु इन्द्रियनिग्रहकृतवान् इन्द्रियाणि विजितवान् स जितेन्द्रियो भवति। तस्य विषये मनुनोक्तम् -

**श्रुत्वा स्पृष्ट्वा च दृष्ट्वा च भुक्त्वा घ्रात्वा च यो नरः ।**
**न हृष्यति ग्लायति वा स विज्ञेयो जितैन्द्रियः ॥**
**इन्द्रियाणां तु सर्वेषां यद्येकं क्षरतीन्द्रियम् ।**
**तेनास्य क्षरति प्रज्ञा दृतेः पादादिवोदकम् ॥**

**वशे कृत्वेन्द्रियग्रामं संयम्य च मनस्तथा।**
**सर्वान् संसाधयेदर्थानक्षिण्वन् योगतस्तनुम् ।।** इति ।। (मनुस्मृतौ २.९८ – १००)

एतदेव भगवान् अपि गीतायां स्पष्टं वक्ति यत् - योगयुक्तः पुरुषः विशुद्धान्तःकरणः भवति। सः स्वमनः विजित्य इन्द्रियाणि च निगृह्य जीवनं यापयति। तस्य दृष्टिः केवलं स्वार्थपर्यन्ता न भवति, अपितु सः सर्वेषु भूतेषु आत्मभावं पश्यति। अतः सः सर्वभूतात्मभूतात्मा इति कथ्यते। एवं सन् सः कर्माणि कुर्वन्नपि तेषु न लिप्यते, यतः तस्य चित्तं अहङ्काररहितं भवति। भगवानुवाच—

**"योगयुक्तो विशुद्धात्मा विजितात्मा जितेन्द्रियः।**
**सर्वभूतात्मभूतात्मा कुर्वन्नपि न लिप्यते।।** इति ।।" (भगवद्गीतायां ५.७)

अस्य तात्पर्यमिदं यत्—योगयुक्तः साधकः कर्मसु प्रवृत्तोऽपि कर्मबन्धनैः न बद्धो भवति। कारणं तु एतत् यत् सः सर्वत्र परमात्मस्वरूपमेव अनुभवति। तस्य अन्तःकरणं निर्मलं भवति, मनः संयतं भवति, इन्द्रियाणि च वशे वर्तन्ते।

तत्त्वज्ञः पुरुषः सर्वकर्मसु प्रवर्तमानोऽपि "अहं किञ्चित् न करोमि" इति भावं धारयति। सः जानाति यत् शरीरम्, मनः, इन्द्रियाणि च स्वभावतः एव कार्येषु प्रवर्तन्ते। आत्मा तु साक्षिमात्रः अस्ति। अतः भगवान् कथयति—

**"नैव किञ्चित्करोमीति युक्तो मन्येत तत्त्ववित्।**
**पश्यञ्शृण्वन्स्पृशञ्जिघ्रन्नश्नन्गच्छन्स्वपञ्श्वसन्॥**
**प्रलपन् विसृजन्गृह्णन्नुन्मिषन्निमिषन्नपि।**
**इन्द्रियाणीन्द्रियार्थेषु वर्तन्त इति धारयन्।।** इति ।।" (भगवद्गीतायां ५.८– ९)

एवम् इन्द्रियनिग्रहः केवलं दमनं न, अपितु उचितदिशायां प्रवर्तनम्। विद्यार्थीजीवने, साधनायां, राष्ट्रनिर्माणे च इन्द्रियनिग्रहस्य महत्त्वं महान्। सम्पति युवानः भोगवादेन आकर्षिताः सन्ति। सामाजिकमाध्यमानि, व्यसनानि, विषयासक्तिः च तेषां चित्तं विचालयन्ति। गीता आत्मसंयमस्य शिक्षां ददाति।

अतः निष्कर्षतया वक्तुं शक्यते यत् मनुस्मृतौ प्रतिपादितः इन्द्रियनिग्रहः, सदाचारः, आत्मसंयमः, राजधर्मः, सामाजिकनैतिकता च अद्यापि अत्यन्तं प्रासङ्गिकाः सन्ति। विशेषतः युवकानां चरित्रनिर्माणे, समाजस्य नैतिकपुनरुत्थाने, राष्ट्रस्य सुदृढीकरणे च मनोः दर्शनं मार्गदर्शकरूपेण अवस्थितम् अस्ति।

**सन्दर्भसूची**


०१. मनुस्मृतिः (मेधातिथिभाष्यसहिता) - एसियाटिक सोसाइटि आफ वेङ्गल, कलिकता, १९३९।
०२. धर्मशास्त्र का इतिहास , सं.अर्जुन चौवे काश्यप, उत्तरप्रदेश हिन्दी संस्थान, लखनउ,१९८० ।
०३. अष्टादशस्मृतिः - सम्पादकः,प.मिहिरचन्द्र,नागप्रकाशक, जवाहरनगर,दिल्ली।
०४. श्रीमद्भगवद्गीता शांकरभाष्यसहिता, गीताप्रेस्, गोरखपुरम्।
०५.ब्रह्मसूत्रशाङ्करभाष्यम्,श्रीशङ्कराचार्यः,भारतीयविद्याप्रकाशनम्,वाराणसी- २००४।
०६.पातञ्जलयोगसूत्रम्,महर्षिःपतञ्जलिः,व्यासभाष्योपेतम्,चौखम्बा सपुरभारतीप्रकाशनम्,वाराणसी।